N. of a tree गणिकारिका (Mar. नरवेल) Premna Spinosa (तत्काष्ठयोर्घर्षणे हि आशु वह्निरुत्पद्यते). —मांद्यं slowness of digestion, loss of appetite, dyspepsia. —मारुतिः [अग्निश्च मरुच्च तयोरपत्यं इञ् ततो वृद्धिः इत् च; द्विपदवृद्धौ पू. पूर्वपदस्य ह्रस्वः Tv.] N. of the sage Agastya. —मित्रः N. of a king of the *Sunga* dynasty, son of Pushpamitra who must have flourished before 150 B. C.–the usually accepted date of Patanjali–as the latter mentions पुष्पमित्र by name. —मुखः *a.* having Agni at the head. (–खः) [अग्निर्मुखमिव यस्य] 1. a deity, god, (for the gods receive oblations through Agni who is therefore said to be their mouth; अग्निमुखा वै देवाः; अग्निर्मुखं प्रथमं देवतानां &c; or अग्निर्मुखे अग्रे येषां, for fire is said to have been created before all other gods.) 2. [अग्निर्मुखं प्रधानमुपास्यो यस्य] one who maintains the sacred fire (अग्निहोत्रद्विज). 3. a Brâhmaṇa in general (अग्निर्दाहकत्वात् शापाग्निर्मुखे यस्य, for Brâhmaṇas are said to be वाग्वज्राः). 4. N. of two plants चित्रक Plumbago Zeylanica and भल्लातक Semicarpus Anacardium (अग्निरिव स्पर्शेन दुःखदायकं मुखमग्रं यस्य, तन्निर्यासस्पर्शेन हि देहे क्षतोत्पत्तेस्तयोस्तथात्वम्). 5. a sort of powder or चूर्ण prescribed as a tonic by चक्रदत्त. 6. ‘ fire-mouthed ’, sharp-biting, an epithet of a bug Pt. 1. (–खी) [अग्निरिव मुखमग्रं यस्याः, गौरादि-ङीष्] 1 N. of a plant भल्लातक (Mar. बिबवा, भिलावा) and लांगलिका (विषलांगला). 2. N. of the Gâyatrî Mantra (अग्निरिव मुखं मुखत्वेन कल्पितं यस्याः सा, or अग्नेरिव मुखं प्रजापतिमुखं उत्पत्तिद्वारं यस्याः, अग्निना समं प्रजापतिमुखजातत्वात्; कदाचिदपि नो विद्यान् गायत्रीमुदके जपेत् । गायत्र्याग्निमुखी यस्मात्तस्मादुत्थाय तां जपेत् ॥ गोभिल). 3. a kitchen [पाकशाला अग्निरिव उत्तप्तं मुखं यस्याः सा]. —मूढ *a.* [तृ. त.] Ved. made insane or stupefied by lightning or fire. —योजनं causing the sacrificial fire to blaze up. —रक्षणं 1. consecrating or preserving the sacred (domestic) fire or अग्निहोत्र. 2. [अग्निः रक्ष्यते अनेन अत्र वा] a Mantra securing for Agni protection from evil spirits &c. 3. the house of an अग्निहोत्र. —रजः,–रजस् *m.* [अग्निरिव रज्यते दीप्यते ; रंज्–असुन्, नलोपः] 1. a scarlet insect by name इंद्रगोप. 2. (अग्नेः रजः) the might or power of Agni. 3. gold. —रहस्यं mystery of (worshipping &c.) Agni; N. of the tenth book of the *Satapatha* Brâhmaṇa. —राशिः a heap of fire, burning pile. —रुहा [अग्निरिव रोहति रुह्–क] N. of the plant मांसादनी or मांसरोहिणी (तदंकुरस्य वह्नितुल्यवर्णतया उत्पत्तत्वात्तथात्वं तस्याः). —रूप *a.* [अग्नेरिव रूपं वर्णो यस्य] fire-shaped ; of the nature of fire. (–पं) the nature of fire. —रेतस् *n.* the seed of Agni ; (hence) gold. —रोहिणी [अग्निरिव रोहति ; रुह्–णिनि] a hard inflammatory swelling in the armpit. —लोकः the world of Agni, which is situated below the summit of Meru; in the Purâṇas it is said to be in the अंतरिक्ष, while in the Kâsi Khaṇḍa it is said to be to the south of इंद्रपुरी ; एतस्या दक्षिणे भागे येयं पूर्वदृश्यते शुभा । इमामर्चिष्मतीं पश्य वीतिहोत्रपुरीं शुभाम् ॥ —वधूः Svâhâ, the daughter of Daksha and wife of Agni. —वर्चस् *a.* [अग्नेर्वर्च इव वर्चो यस्य] glowing or bright like fire.(–*n.*) the lustre of Agni.(–*m.*) N. of a teacher of the Purâṇas. —वर्ण *a.* [अग्नेरिव वर्णो यस्य] of the colour of fire; hot, fiery; सुरां पीत्वा द्विजो मोहादग्निवर्णां सुरां पिबेत् Ms. 11. 91; गोमूत्रमग्निवर्णं वा पिबेदुदकमेव वा 92.(–र्णः) 1. N. of a prince, son of Sudarsana. 2. of a King of the solar race, See R. 19. 3. the colour of fire.(–र्णा) a strong liquor. —वर्धक *a.* stimulating digestion, tonic. (–कः) 1. a tonic. 2. regimen, diet (पथ्याहार). —वल्लभः [अग्नेर्वल्लभः सुखेन दाह्यत्वात्] 1. the *Sâla* tree, Shorea Robusta. 2. the resinous juice of it. —वाससः *a.* [अग्निरिव शुद्धं वासो यस्य] having a red (pure like Agni) garment. (–*n*) a pure garment. —वाह *a.* [अग्निं वाहयति गमयति अनुमापयति वा] 1. smoke. 2. a goat. —वाहनं a goat (छाग). —विद् *m.* 1. one who knows the mystery about Agni. 2. an अग्निहोत्रिन् q.v. —विमोचनं ceremony of lowering the sacrificial fire. —विसर्पः pain from an inflamed tumour, inflammation. —विहरणं,–विहारः 1. taking the sacrificial fire from अग्नीध्र to the सदोमंडप. 2. offering oblations to fire; ग्रस्तास्ता °वेला K. 348. —वीर्यं 1. power or might of Agni. 2. gold. —वेशः [अग्नेर्वेश इव] N. of an ancient medical authority (चरक). —शरण–शाला-लं a fire–sanctuary ; °मार्गमादेशय *S.* 5 ; a house or place for keeping the sacred fire ; °रक्षणाय स्थापितोऽहं V. 3. —शर्मन् *a.* [अग्निरिव शृणाति तीव्रकोपत्वात्; शॄ–मनिन्] very passionate. (–*m.*) N. of a sage. —शिख *a.* [अग्नेरिव अग्निरिव वा शिखा यस्य]. fiery, fire-crested ; दहतु °खैः सायकैः Rám. (–खः) 1. a lamp. 2. a rocket, fiery arrow. 3. an arrow in general. 4. safflower plant. 5. saffron. 6. जांगलीवृक्ष. (–खं) 1. saffron. 2. gold. (–खा) 1. a flame ; शरैरग्निशिखोपमैः Mb. 2. N. of two plants लांगली (Mar. वागचवका or कळलावी) Gloriosa Superba; of another plant (Mar. also कळलावी) Menispermum Cordifolium. —शुश्रूषा careful service or worship of fire. —शेखर *a.* fire-crested.(–रः) N. of the कुसुंभ, कुंकुम & जांगली trees. (–रं) gold. —शौच *a.*[अग्नेरिव शौचं यस्य] bright as fire; purified by fire K. 252. —श्री *a.* [अग्नेरिव श्रीर्यस्य] glowing like fire; lighted by Agni. —ष्टुत्,-ष्टुभ्,-ष्टोम &c. see °स्तुत्, °स्तुभ् &c. —संस्कारः 1. consecration of fire. 2. hallowing or consecrating by means of fire; burning on the funeral pile; यथार्हं °रं मालवाय दत्त्वा Dk. 169; नास्य कार्योऽग्निसंस्कारः Ms. 5. 69, R. 12. 56. —सखः, –सहायः 1. the wind. 2. the wild pigeon (smoke–coloured) 3. smoke. —संभव *a.* [पं. ब.] sprung or produced from fire.(–वः) 1. wild safflower. 2. lymph, result of digestion. (–वं) gold. —साक्षिक [अग्निः साक्षी यत्र, कप्] *a.* or *adv.* keeping fire for a witness, in the presence of fire ; पंचबाण° M. 4.12 ; °मर्यादो भर्ता हि शरणं स्त्रियाः H.1. v. l., R. 11.48. —सारं [अग्नौ सारे यस्य अत्यंतानलोत्तापनेपि सारांशादहनात् Tv.] रसांजन, a sort of medical preparation for the eyes.(–रः –रं) power or essence of fire. —सूत्रं a thread of fire. 2. a girdle of sacrificial grass (मौंजीमेखला) put upon a young Brâhmaṇa at the time of investiture. —स्तंभः 1. stopping the burning power of Agni. 2. N. of a Mantra used in this operation. 3. N. of a medicine so used. —स्तुत् *m.* (अग्निष्टुत्) [अग्निः स्तूयतेऽत्र; स्तु–आधारे क्विप् षत्वं] the first day of the Agnishṭoma sacrifice; N. of a portion of that sacrifice which extends over one day; यजेत वाश्वमेधेन स्वर्जिता गोसवेन वा । अभिजिद्विश्वजिद्भ्यां वा त्रिवृताग्निष्टुतापि वा ॥ Ms. 11. 75. —स्तुभ् (°ष्टुभ्) *m.* [अग्निः स्तुभ्यतेऽत्र; स्तुभ्–क्विप् षत्वं] 1. =अग्निष्टोम. 2. N. of a son of the sixth Manu. —स्तोमः (°ष्टोमः) [अग्नेः स्तोमः स्तुतिसाधनं यत्र] N. of a protracted ceremony or sacrificial rite extending over several days in spring and forming an essential part of the ज्योतिष्टोम. 2. a Mantra or Kalpa with reference to this sacrifice; °मे भवो मंत्रः °मः ; °मस्य व्याख्यानं, कल्पः °मः P. IV. 3. 66. Vârt. 3. N. of the son of the sixth Manu. 4. a species of the Soma plant ; °सामन् a part of the Sâma Veda chanted at the conclusion of the Agnishṭoma sacrifice. —स्थ *a.* (ष्ठ) [अग्नौ स्थातुमर्हति; स्था-